॥ श्रीगणेशायनमः ॥ केशाजार्कनिशाकरान् क्षितिजविज्जीवास्फुजित्सूर्यजान्विघ्नेशंस्वगुरुंप्रणम्यशिरसा देवींचवागीश्वरीम् ॥ प्रश्नज्ञानवतोवराहमिहिरापत्यस्यसद्वस्तुनोलोकानांहितकाम्ययाद्विजवरष्टीकांकरोत्यु त्पलः॥ १ ॥कानीहशास्त्रेसंबंधाभिधेयप्रयोजनानि भवंतीत्युच्यते आब्रह्मादिविनिश्चितमिदंवेदांगमिति सं बंधः ॥ लग्नहोराद्रेष्काणनवांशकादिनाग्रहसंस्थानदर्शनेनचगमागमजयपराजयलाभालाभहृतनष्टादिपरि ज्ञानमभिधेयम्॥ सत्पात्रेशुभाशुभकथनादिहलोकपरलोकसिद्धिरितिप्रयोजनं॥ किमेभिरुक्तैरित्युच्यते॥ सि द्धिःश्रोतृप्रवृत्तीनांसंबंधकथनाद्यतः ॥ तस्मात्सर्वेषुशास्त्रेषुसंबंधःपूर्वमुच्यते॥ सर्वस्यैवहिशास्त्रस्यकर्मणोवा पिकस्यचित्॥यावत्प्रयोजनंनोक्तंतावत्केननगृह्यते॥कस्यास्मिन्शास्त्रेऽधिकारः॥उच्यते॥ द्विजस्यैव यतस्तेन षडंगोवेदोऽध्येतव्योज्ञातव्यश्चेति कान्यंगानीत्युच्यते शिक्षाकल्पोव्याकरणंनिरुक्तंज्योतिषांगतिः॥ छंदसांल क्षणंचैवषडंगोवेदउच्यते इति॥सतामयमाचारोयच्छास्त्रस्यांरेभेष्वभिमतेदवतानमस्कारंकुर्वंति तदायमपि आवंतिकाचार्योद्विजोवराहमिहिरात्मजःपृथुयशाः संक्षिप्तांप्रश्नविद्यां स्वसूत्रैः कर्तुकामः आदावेवभगवतः श्रीसूर्यस्यनमस्कारंस्वनामाख्यापनंचप्राह प्रणिपत्येति वराहमिहिराख्यस्याचार्यस्य आत्मजेनपुत्रेणपृथुय

Digitized by Panjab Digital Library | www.panjabdigilib.org

शसापृथुयशाइत्यभिधानंयस्यतेनरविंसूर्यंमूर्ध्नाशिरसाप्रणिपत्यनमस्कृत्यप्राश्नेप्रश्नविषये इयंप्रश्नविद्याकृ
तारचिता कीदृशीअर्थगहना अर्थोभिधेयंगहनोगुह्योयस्याःसाअर्थगहना किमर्थम् परार्थमुद्दिश्य परेषांलो
कानांअर्थः प्रयोजनम् परार्थंउद्दिश्याऽनुसंधाय कीदृशेनपृथुयशसा सद्यशसा सत्शोभनं यशःकीर्तिर्यस्य

प्रणिपत्यरविंमूर्ध्नावराहमिहिरात्मजेनपृथुयशसा ॥
प्राश्नेकृतार्थगहनापरार्थमुद्दिश्यसद्यशसा ॥ १ ॥
च्युतिर्विलग्नाद्बिवुकाच्चवृद्धिर्मध्यात्प्रवासोस्तमयान्निवृत्तिः ॥

तथाभूतेनविद्याशौर्यादिगुणयुक्तेनेत्यर्थः ॥ १ ॥ अधुनालग्नचतुर्थसप्तमदशमानांचतुर्णांस्थानानांविचारप्र
विभागमाह च्युतिर्विलग्नेति च्युतिःच्यवनंस्थानपरिभ्रंशः विलग्नात्तात्कालिकात्पृच्छालग्नात् च्युतिर्ज्ञेया प्र
ष्टापृच्छति अमुकस्थानान्मेच्युतिर्भविष्यतिवानेत्येतत्विलग्नात् ज्ञेयम् एवंहिबुकाच्चतुर्थस्थानात् गृहसुह

Digitized by Panjab Digital Library | www.panjabdigilib.org

त्सुखानांवृद्धिर्ज्ञेया मध्यंदशमस्थानंतस्मात् प्रवासोज्ञेयः प्रवसनंप्रवासः अन्यदेशगमनं अस्तमयात्सप्तम स्थानान्निवृत्तिः प्रवासान्निवर्तनम् कथमेवमुच्यते चरस्थिरद्विस्वभात्मकत्वेन यतउक्तम् प्रश्नविलग्नकालात् प्रश्नः पृच्छा प्रश्नेविलग्नंप्रश्नविलग्नं तस्यकालः समयस्तस्मात् तेनचरराशौलग्नगतेस्वामिनायुते दृष्टे वाशुभग्रहाणामन्यतमेनवायुतेदृष्टेपरिशिष्टग्रहसंयोगसंदर्शनरहितेच्युतिर्भवति अन्यथानभवत्येव यतउक्तं वाच्यंग्रहैः कारणभूतैः सर्वमेवैतत् वाच्यंवक्तव्यं एवंस्थिरराशौपापग्रहदर्शनयोगरहितेपिनभवत्येव यतो वक्ष्यति । वृषसिंहवृश्चिकघटैर्विद्विस्थानंगमागमौनस्त इति।तथा द्विस्वभावेभवतिवानवास्वामिशुभग्रहदर्शनाधिक्यात्पापानामल्पत्वाच्चभवति अन्यथानभवत्येव एवंचतुर्थस्थानस्य सामान्यतयैवशुभग्रहस्वामिदर्शनयोगात्ग्रहादीनांवृद्धिः अन्यथापचयः अथोप्रवासः दशमस्थानस्यचरराश्यात्मकत्वात् पापग्रहदर्शनयोगात्प्रवासः अन्यथास्वामिशुभग्रहदर्शनयोगाच्चनप्रवासः सप्तमस्थानस्यचरराश्यात्मकत्वात् पापग्रहदर्शनान्नप्रवासान्निवृत्तिः अन्यथास्वामिसौम्यग्रहदर्शनयोगाच्चनिवृत्तिः गृहंप्रविष्टोहिबुकेप्रवासी हिबुकेचतुर्थस्थानेप्रवासीविदेशस्थोनरोगृहंवेश्मप्रविष्टोनवेतिवक्तव्यं चतुर्थस्थानेस्वस्वामिदृष्टेयुक्तेवागृ

Digitized by Panjab Digital Library | www.panjabdigilib.org

हंप्रविष्टोन्यथानप्रविष्टइति हिबुकेगृहंप्रविष्टंगृहप्रविष्टंप्रवासिनंविद्धि हिबुकास्तमयांतरगेग्रहेचपथिव र्त्तेपुरुषइति तस्यप्रविष्टस्यग्रहस्ययावंतिदिनानिव्यतीतानितावंत्येवगृहंप्रविष्टस्यप्रवासिनोगतानि अथवायावद्भिर्दिनैः स ग्रहः चतुर्थस्थाने यास्यति तावद्भिरेवप्रवासीगृहंप्रविशतीति एतद्दूरगतस्यागमनंचेत् अस्मिन्वक्ष्यमाणेयोगेसतिवक्तव्यम् नान्यथेति एतच्चपुरस्ताद्विस्तरेणाभिधीयतइति ॥ २ ॥

वाच्यंग्रहैःप्रश्नविलग्नकालात् गृहंप्रविष्टोहिबुकेप्रवासी ॥ २ ॥
योयोभावः स्वामिदृष्टोयुतोवासौम्यैर्वास्यात्तस्यतस्यास्तिवृद्धिः ॥

अधुनातन्वादीनांद्वादशभावानांशुभाशुभज्ञानमाह योयोभावइति तनुधनसहजसुहृत्सुतरिपुजायामृत्युधर्मकर्मायव्ययाइति लग्नात्द्वादशभावाउक्ताः तथाकुजशुक्रज्ञेंद्वर्कज्ञशुक्रकुजजीवसौरियमगुरवः इतिराश्यधिपाउक्ताः नवांशकानामजमकरतुलाकुलीराद्याः तथाक्षीणेंद्वर्कयमाराः पापास्तैः संयुतः सौम्य इतिग्रहाणांपापसौम्यत्वमुक्तम् तथा दशमतृतीयेनवपंचमेचतुर्थाष्टमेकलत्रंच पश्यंतिपादैवृद्ध्याफलानि

Digitized by Panjab Digital Library | www.panjabdigilib.org

चैवंप्रयच्छंति सर्वमेतद्दृष्टिफलमुक्तंतेनपृच्छासमयेयः कश्चिद्भावस्तन्वादिकः स्वामिनात्मीयनाथेनदृष्टो ऽवलोकितः तस्यभावस्यवृद्धिरुपचयोस्तिविद्यते अथवातेनैवस्वामिनायुतः संयुक्तः तस्यापिवृद्धिरस्ति सौम्यैर्वास्यात् सौम्यग्रहाणां बुधगुरुशुक्रपूर्णचंद्राणांअन्यतमेनवायुतोदृष्टोवाभावः स्यात्भवेत् तस्यापि वृद्धिरस्तिवर्द्धनंवक्तव्यं पापैरेवमिति एवमनेनप्रकारेणपापैः पापग्रहैरपिरविक्रूरयुतबुधभौमसौरिक्षीणचं

पापैरेवंतस्यभावस्यहानिर्निर्देष्टव्यापृच्छतांजन्मतोवा ॥ ३ ॥

द्राणामन्यतमेनयोयोभावोयुक्तोदृष्टोवा तस्यभावस्यहानिरपचयोनिर्देष्टव्यावक्तव्या कस्मादितितदेवाह पृच्छतां जन्मतोवेति पृच्छतांपृच्छासमये नराणांजन्मतोवाजायमानानां तथाचोक्तंजातके पुष्णंतिशु भाभावांस्तन्वादीन्घ्नंतिसंस्थिताःपापाः सौम्याःषष्ठेरिघ्राःसर्वेनेष्टाव्ययाष्टमगाःइति जन्मन्याधानका लेप्रश्नकालेवेति ॥ ३ ॥

Digitized by Panjab Digital Library | www.panjabdigilib.org

अधुनाप्रश्नसमयेलाभादौशुभाशुभज्ञानमाह सौम्यइति सौम्यानांशुभानांग्रहाणांबुधगुरुशुक्रपूर्णचंद्राणा मन्यतमेविलग्नेस्थितेयदिवास्यसौम्यग्रहस्यवर्गेतत्कालंविलग्नेप्राप्तेगृहहोराद्रेष्काणनवमभागद्वादशांशक-त्रिंशांशाः वर्गः प्रत्येतव्योग्रहस्ययोयस्यांविनिर्दिष्टइतिवर्गलक्षणमुक्तम् अथशीर्षोदयेपृच्छालग्ने मेषाद्याश्च त्वारःसधन्विमकराःक्षपाबलाज्ञेयाः पृष्ठोदयाविमिथुनाः शिरसान्येद्युभयतोमीनः इतिराशिपृष्ठोदयत्वंशी र्षोदयत्वंचोक्तं एतेषामन्यतमेयदिविलग्नेपृच्छतोभवतितत्कार्यंसिद्धिंसाध्यतामुपैतिगच्छति अतोविपर्यस्त

सौम्येविलग्नेयदिवास्यवर्गेशीर्षोदयेसिद्धिमुपैतिकार्यम् ॥

मितिअतोस्मात्पूर्वोक्ताद्विपर्यस्तंविपरीतमस्ति असिद्धिहेतुरसाध्यतायाःकारणम् एतदुक्तंभवति पापग्रहेण विलग्नस्थेनपापवर्गेवाविलग्नगतेपृष्ठोदयेवालग्नगते प्रष्टुःकार्यनसिद्ध्यति कृच्छ्रेणसंसिद्धिकरंविमिश्रं तत्पूर्वोक्तंविमिश्रितंसंकीर्णंयदिभवेत्तदाप्रष्टुःकृच्छ्रेणक्लेशेनसंसिद्धिकरंकार्यसाधकंभवति एतदुक्तंभवतिपा पसौम्योद्वावपिलग्नस्थौभवतः पापसौम्यौवर्गस्थौवाउभयोदयोमीनोवाशीर्षोदयः पापयुक्तः पापवर्ग

Digitized by Panjab Digital Library | www.panjabdigilib.org

स्थोवापृष्ठोदयः सौम्ययुक्तः सौम्यवर्गस्थोवाउभयोदयोवा तदाक्लेशेनसिद्धिकृद्भवति तत्रचबलाधिक्यान्निश्चयइति ॥ ४ ॥ अधुनानष्टलाभज्ञानमाह होरास्थितइति शशांकश्चंद्रःपूर्णतनुः परिपूर्णमंडलः दशमीमारभ्यकृष्णपंचमीयावत् पूर्णतनुर्भवति तथाचयवनेश्वरः मासेचशुक्लप्रतिपत्प्रवृत्तेःपूर्ण.शशीमध्यबलोदशाहे श्रेष्ठोद्वितीयेल्पबलस्तृतीयेसौम्यैस्तुदृष्टोबलवान्सदैव एवंपूर्णतनुःशशांकः होरायांलग्नेस्थितः होरेति

अतोविपर्यस्तमसिद्धिहेतुःकृच्छ्रेणसंसिद्धिकरंविमिश्रम् ॥ ४ ॥
होरास्थितःपूर्णतनुःशशांकोजीवेनदृष्टोयदिवासितेन ॥
क्षिप्रंप्रणष्टस्यकरोतिलब्धिंलाभोपयातोबलवान्शुभश्च ॥ ५ ॥

लग्नंभवनस्यचार्द्धमिति लग्नस्यहोराव्यपदेशः तत्रस्थः शशीजीवेनगुरुणादृष्टोऽवलोकितः यदिवा सितेनशुक्रेणदृष्टोभवति यदिवेत्ययं निपातोविकल्पे क्षिप्रमाश्वेवप्रणष्टस्यापहृतस्यद्रव्यादेर्लब्धिंलाभंकरोति लाभोपयातइति अथवा शुभः सौम्यग्रहः बलवान्वीर्ययुतोलाभेएकादशस्थानेउपयातः प्राप्तोभवति तथापि

Digitized by Panjab Digital Library | www.panjabdigilib.org

चशब्दात्क्षिप्रमेवनष्टस्यलब्धिंकरोतीति ग्रहाणांस्थानदिक्चेष्टाकालबलंजातकेप्रोक्तम् बलवान्मित्रःस्व
गृहोच्चैरित्यारभ्यस्वादिनादिष्वशुभशुभाइत्येतदंतम् ॥ ५ ॥ अधुनाहृतनष्टमुष्टिगतचिंतितानांधातुमूलजी
वानांपरिज्ञानमाह स्वांशेति यःकश्चिद्ग्रहः तत्कालंस्वांशेआत्मीयनवांशकेस्थितः विलग्नेनग्नलग्नेतत्कालो
दितंस्वांशंतस्यैवग्रहस्यात्मीयंनवांशकंतच्चपश्यत्यवलोकयतितदाप्रष्टुः धातुचिंतांवदेत् सुवर्णादिमृत्तिकांतं
धातुद्रव्यं एतदुक्तंभवति स्वांशकस्थोग्रहःस्वांशकयुक्तंलग्नंपश्यति तदाधातुचिंतांप्रवदेत् अथवालग्नगतं

स्वांशेविलग्नेयदिवात्रिकोणेस्वांशेस्थितःपश्यतिधातुचिंताम् ॥

स्वांशंनपश्यति तदात्रिकोणेनवमस्थानेस्थितंतमेवस्वांशंपश्यति पंचमेस्थितंतमेवस्वांशंपश्यति नवमस्था
नंपंचमस्थानंवास्वांशकसमेतंपश्यतीत्यर्थः यतोलग्नपंचमनवमानामेकएवांशः तुल्यकालमुदेति एतदुक्तं
भवति स्वनवांशकस्थोग्रहोलग्नपंचमनवमानामन्यतमस्वांशकयुतंपश्यति तदाधातुचिंतांवदेत् तत्रापिध
म्याधाम्यप्रविभागोग्रहांशकवशाद्वाच्यः पापग्रहांशकमवस्थितस्यधाम्यंसौम्यग्रहांशकसमवस्थितस्या-
धाम्यमिति परांशकस्थस्तुकरोतिजीवमिति यःकश्चिद्ग्रहः परनवांशकस्थोन्यग्रहंनवभागावस्थितोवि-

Digitized by Panjab Digital Library | www.panjabdigilib.org

लग्नगतं स्वांशंपश्यति त्रिकोणयोरन्यतमगतंवा तदाजीवचिंतांवदेत् पुरुषादिसरीसृपांतो जीवः तत्रापि ग्रहयुक्तनवांशकवशात् द्विपदचतुष्पदसरीसृपादिविभागोज्ञेयः मिथुनकन्यातुलाधनुःपूर्वार्द्धकुंभाद्विपदा देवानराः पक्षिणश्चद्विपदाज्ञेयाः मेषवृषसिंहधन्विपरार्द्धाश्चतुष्पदाः कर्कवृश्चिकमकरमीनाः सरिसृपाः तत्रमीनोह्यपदः अन्येतुबहुपदाः मूलंपरांशोपगतःपरांशमिति यः कश्चिद्ग्रहः परांशोपगतोन्यग्रहनवांश-केसमवस्थितोविलग्नगतंपरनवांशकं त्रिकोणयोरन्यतमगतंवापश्यति तदामूलंकरोतिमूलचिंतांप्रवदेत्

परांशकस्थश्चकरोतिजीवंमूलंपरांशोपगतःपरांशम् ॥ ६ ॥

एतद्यतः प्रायः संभवति तच्चापि ग्रहबलदर्शनात्ज्ञेयम् वृक्षादितृणांतंमूलं तत्रापिग्रहयुक्तनवांशकवशा-त्स्थलजलत्वंज्ञेयं कर्कमकरमीनाः जलजाः अन्येतुसर्वेस्थलजाइति तथाच चिंतासिद्धिप्रश्नज्ञानेउक्तं स्वांशेस्थितोविलग्नेयदाग्रहःस्वांशकंनिरीक्षेत धातोस्तदातुचिंतांकरोतिपरसंस्थितोजीवं परभागसन्नि-विष्टः परांशकंप्राग्विलग्नमायातम् पश्यतिमूलंप्रवदेदेवंनवपंचमेज्ञेयम् ॥ ६ ॥ एतदेवपुनरपिप्रकारांतरेणा-

Digitized by Panjab Digital Library | www.panjabdigilib.org

ह धातुमिति मेषमिथुनसिंहतुलाधनुःकुंभाओजराशयः वृषकर्ककन्यावृश्चिकमकरमीनायुग्मराशयःतत्र ओजेविषमेराशौलग्नगते प्रथमनवांशकोदयेधातुंप्रवदेत् द्वितीयेमूलं तृतीयेजीवं पुनःसप्तमेधातुं अष्टमे मूलं नवमेजीवमिति युग्मेविद्यादेतदेवप्रतीपम् युग्मेयुग्मराशौलग्नगतेनवांशकक्रमेणैतदेवपूर्वोक्तंप्रतीपं विपर्ययेणविद्यात्जानीयात् तेनप्रथमनवांशकोदयेजीवं द्वितीयेमूलं तृतीयेधातुं पुनश्चतुर्थेजीवं पंचममूलं

धातुंमूलंजीवमित्योजराशौयुग्मेविद्यादेतदेवप्रतीपम्॥
लग्नेयोंशस्तत्क्रमाद्गण्यएवसंक्षेपोयंविस्तरात्तत्प्रभेदः॥ ७॥

षष्ठेधातुं पुनःसप्तमेजीवं अष्टममूलं नवमेधातुमिति एवमनेनप्रकारेण क्रमात्परिपाट्यालग्नेविलग्नेयोंशो योनवमभागः तत्कालमुदितः सयावद्गण्योगणनीयः अत्रचलग्ननवांशकवशात्प्राग्वद्योनिविभागः केचि त्द्रेष्काणत्रितयेयथासंख्यंधातुंमूलंजीवमित्योजराशौयुग्मेविद्यादेतदेवप्रतीपमितिवर्णयंति तच्चायुक्तम् य स्मात्पुरस्तादाचार्यएववक्ष्यति अंशकात्ज्ञायतेद्रव्यमिति अयंसंक्षेपःसमासउक्तः विस्तरात्व्यासेना

Digitized by Panjab Digital Library | www.panjabdigilib.org

स्यैवार्थस्यप्रभेदः स्पष्टताअभिधीयतइति ॥ ७ ॥ इतिश्रीभट्टोत्पलविरचितायांषट्पंचाशिकायांहोराविवृतौसंक्षेपात्होराध्यायः प्रथमः ॥ १ ॥ ॥ ७ ॥ अथातोगमागमाध्यायोव्याख्यायते तत्रादावेवस्थानगमागमजीवितमरणरोगशांतिपराभिभवज्ञानमाह वृषसिंहेति वृषसिंहवृश्चिकाः प्रसिद्धाः घटःकुंभः एतेस्थिरराशयएतैर्वृषसिंहवृश्चिकघटैः एतेषामन्यतमेलग्नंप्राप्तेस्थानंविद्धिजानीहि प्रष्टुःस्थानलाभोभवति गमा

इतिवराहमिहिरात्मजपृथुयशोविरचितायांषट्पंचाशिकायांहोराध्यायःप्रथमः ॥ १ ॥ ॥ ७ ॥ वृषसिंहवृश्चिकघटैर्विद्धिस्थानंगमागमौनस्तः ॥ नमृतंनचापिनष्टंनरोगशांतिर्नचाभिभवः ॥ १ ॥

गमौनस्तः गमश्च आगमश्चगमागमौतौनस्तः नभवतः नमृतंमृतंमरणंनभवतिजीवत्येव नचापिनष्टं धात्वादिद्रव्यंधनं अदर्शनपथिस्थितं ननष्टंननाशंप्राप्तम् अथवाविदेशस्थोनरस्तस्मात् स्थानातूननष्टः अन्यदेशंनगतः नरोगशांतिः रोगोज्वरादिः तस्यशांतिः शमनंव्याध्यभिभूतस्यनभवति नचाभिभवः अभिभव

Digitized by Panjab Digital Library | www.panjabdigilib.org

पराजयः सः शत्रोः सकाशात्न भवति ॥ १ ॥ तद्विपरीतंतुन्नरैरिति चराः मेषकर्कटतुलामकराः तदित्य
नेनानंतरोक्तंविद्धि स्थानमित्यादिकंसर्वंप्रत्यवमृश्यते चरैःचराभिधानैः पृच्छालग्नस्थैः तत्फलमनंतरोक्तं
विपरीतंविपर्ययाद्भवति पूर्वमुक्तंविद्धि स्थानमिति तत्रचरैः स्थानप्राप्तिर्नास्तीतिवाच्या गमागमौनस्तइति
पूर्वमुक्तं चरैर्गमागमौविद्येते पूर्वमुक्तंनमृतः चरैर्मृतइतिवक्तव्यं पूर्वमुक्तंनचापिनष्टं चरैर्नष्टमितिवाच्यं
पूर्वमुक्तंनरोगशांतिः चरैः रोगशांतिर्भवतीतिवाच्यं पूर्वमुक्तंनचाभिभवः चरैरभिभवोभवतीतिवक्तव्यम्

तद्विपरीतंतुचरैर्द्विशरीरैर्मिश्रितंफलंभवति ॥

द्विशरीरैर्मिश्रितंफलंभवतिइति द्विशरीराः द्विस्वभावाः मिथुनकन्याधन्विमीनाः तैः पृच्छालग्नेमिश्रितं
फलंभवति यत्स्थिरैरुक्तम् यच्चरैरुक्तं तन्मिश्रितमुभयंफलंभवति भवतिनभवतीतिवासर्वमेतद्यथोद्दिष्टम्
तत्र अयंनिश्चयः द्विस्वभावलग्ने प्रथमेर्द्धेस्थिरवत्फलंसर्ववदेत् द्वितीयेर्द्धेचरवत् यतस्तस्यप्रथमार्द्धं स्थिर-
समीपवर्त्ति द्वितीयं चरसमीपवर्त्तीति तथाचास्मदीयेप्रश्नज्ञाने स्थिरराशौ लग्नगतेस्थानप्राप्तिंवदेन्नचागम-

Digitized by Panjab Digital Library | www.panjabdigilib.org

नम् रोगोपशमोनाशोद्रव्याणांस्यात्पराभवोनात्र चरराशौविपरीतंमिश्रंवाच्यंद्विमूर्त्युदये स्थिरवत्प्रथमे र्द्वेस्यादपरेचरराशिवत्सर्वमिति लग्नेंद्वोर्वक्तव्यमिति लग्नंप्रश्नलग्नं इंदुश्चंद्रः तयोर्लग्नेंद्वोर्द्वयोरपिशुभदृष्ट्या सौम्यग्रहदर्शनेनशोभनंफलंवक्तव्यम् देहमनोरूपत्वात् लग्नेंदूसौम्यदृष्टौसंपत्करौभवतः अतोन्यदिति अतोस्मादुक्ताद्विपरीतेन्यदशुभं वक्तव्यं तेनलग्नेंदूपापदृष्टौयदिभवतस्तदासर्वपृच्छास्वशोभनंफलंवक्तव्यम्

लग्नेंद्वोर्वक्तव्यंशुभदृष्ट्याशोभनमतोन्यत् ॥ २ ॥ सुतशत्रुगतैःपापैः शत्रुर्मार्गान्निवर्तते ॥ चतुर्थगैरपिप्राप्तःशत्रुर्भग्नोनिवर्तते ॥ ३ ॥

अर्थादेकैकस्मिन्नुभयदृष्टेमध्यमंफलंभवति ॥ २ ॥ अधुनाशत्रोर्मार्गनिवृत्तिज्ञानमाह सुतशत्रुगतैरिति सुतश्चशत्रुश्चसुतशत्रू अनयोर्गतैः सुतस्थानंपंचमंरिपुस्थानंषष्ठं अनयोर्द्वयोरपिस्थानयोः एकस्मिन्वापापैः सूर्यभौमशनिक्षीणचंद्रैः प्रश्नलग्नाद्गतैः समवस्थितैः प्रष्टुःशत्रुःरिपुर्मार्गात्पथःनिवर्ततेगच्छतितैरेवपापःलग्नाच्चातुर्थस्थानेसमवस्थितैः अपिशब्दः संभावनायां प्रश्नोपिशत्रुर्निकटस्थोभग्नः पराजितोनिवर्त्तते

Digitized by Panjab Digital Library | www.panjabdigilib.org

प्रतीपंगच्छतीत्यर्थः ॥ ३ ॥ अथान्ययोगांतरमाह झषेति झषोमीनः अलिर्वृश्चिकःकुंभकर्कटौप्रसिद्धौ एतेरसातलेलग्नाच्चतुर्थस्थानेस्थिताएतेषामन्यतमःप्रश्नलग्नाच्चतुर्थस्थानेयदासमवस्थितोभवति तदारिपोः शत्रोःपराजयोऽभिभवोभवति चतुष्पदैःपलायनमिति मेषवृषसिंहधन्विपराद्धाश्चतुष्पदाः एतेषामन्यतमे लग्नाच्चतुर्थस्थे शत्रोःःपलायनमपसर्पणंभवतीत्यर्थः ॥४॥ अथयायिनांप्रतिशुभाशुभफलमाह चरोदयइति

झषालिकुंभकर्कटारसातलेयदास्थिताः ॥ रिपोःपराजयस्तदाचतु
ष्पदैःपलायनम् ॥ ४ ॥ चरोदयेशुभःस्थितःशुभंकरोतियायिनाम् ॥

चरोदयेचरराश्युद्गमेतस्मिंश्चशुभग्रहणांबुधजीवशुक्राणां अन्यतमःस्थितश्चेत् यायिनांगच्छतां शुभंश्रेयः करोतिविदधाति तस्मिन्नेवचरोदये अशोभनैःस्थितैःपापग्रहाणां रविभौमार्कजानामन्यतमेस्थितेते षामेवयायिनामशोभनमश्रेयःकरोति स्थिरोदयेपिवाशुभम् स्थिराणामन्यतमस्योदयेपापसंयुक्तेविकल्पे नशुभंभवति तत्स्थानंपापग्रहस्यस्वक्षेत्रम् उच्चंमूलत्रिकोणंमित्रक्षेत्रंवाभवति तदाशुभमन्यथानशुभमि

Digitized by Panjab Digital Library | www.panjabdigilib.org

त्यर्थः केचित्स्थिरेष्टमेपिवाशुभमितिपठंति स्थिरराशौलग्नादष्टमेपापसंयुक्तेवाशुभंप्राग्वदिति ॥ ५ ॥
अथशत्रोर्गमागमज्ञानमाह स्थिरेशशीति स्थिरेस्थिरराशौशशीचंद्रोभवति चरोदयेचरराशौलग्नगते प्र
श्नलग्नगते प्रश्नकालेयदारिपोःशत्रोर्नचागमः आगमोनविद्यते तदातस्मिन्नेवप्रश्नेरिपोरागममागमनंव
देत्ब्रूयात् विपर्ययेविपर्ययमिति अस्मादेवपूर्वोक्ताद्विपर्यये अन्यथात्वेविपर्ययंविपरीतमेववक्तव्यं एतदु

**अशोभनैरशोभनंस्थिरोदयेपिवाशुभं ॥ ५ ॥ स्थिरेशशीचरोदयेनचागमोरि
पोर्यदा ॥ तदागमंरिपोर्वदेद्विपर्ययेविपर्ययम् ॥ ६ ॥ स्थिरेतुलग्नमागतेद्विरात्म
केतुचंद्रमाः ॥ निवर्त्ततेरिपुस्तदासुदूरमागतोपिसन् ॥ ७ ॥**

क्तंभवति चरेशशिनिस्थिरराशौलग्नगतेयदिरिपोरागमनंश्रूयते तदातस्मिन्प्रश्नेनागच्छतीतिवदेत् ॥ ६ ॥
अथशत्रुनिवृत्तिज्ञानमाह स्थिरेत्विति स्थिरराशौलग्नमागते तत्काललग्नंप्राप्तेद्विरात्मकेद्विस्वभावेराशौय
दाचंद्रमाःशशीभवति तदारिपुःशत्रुःसुदूरमागतोपिसन्स्वस्थानात् सुतरांदूरमागतोपिनिवर्तते प्रतीपं

Digitized by Panjab Digital Library | www.panjabdigilib.org

गच्छतीति अपिशब्दःसंभावनायाम् ॥७॥ अथान्ययोगांरतमाह चरेशशीति चरेचरराशौशशीचंद्रमाभवति तथालग्नगतःप्राग्लग्नस्थोद्विदेहो द्विःस्वभावोराशिर्यदातस्मिन्कालेपथोमार्गस्यार्द्धमागत्यनिवर्त्ततेप्रतीपंगच्छति तुशब्दोवधारणे विपर्ययइति विपरीतेशत्रोरागमनं द्विधाद्विप्रकारेणस्याद्भवेत् एतदुक्तंभवति द्विस्वभावराशिस्थेशशिनिचरराशौलग्नगतेशत्रोरागमनंबलवन्नभवेत् पराजयःस्यादशुभेक्षितेत्वितितस्मि

चरेशशीलग्नगतोद्विदेहःपथोर्द्धमागत्यनिवर्त्ततेरिपुः॥
विपर्ययेचागमनंद्विधास्यात्पराजयःस्यादशुभेक्षितेतु ॥ ८ ॥

न्नेवाविपरीतेयोगेविपरीते चंद्रलग्नेवाशुभेक्षितेपापग्रहसंदृष्टे शत्रोःसकाशात् प्रष्टुःपराजयोऽभिभवःस्याद्भवेत् एतदुक्तंभवति द्विस्वभावराशिस्थितेशशिनिचरराशौलग्नगतेद्वयोरपिपापदृष्टयोःशत्रोरागमनंद्विधाभवति समागमश्चपराजयंकरोतीत्यर्थः ॥ ८ ॥ अन्यदपिगमागममाह अर्केति अर्कःआदित्यः

Digitized by Panjab Digital Library | www.panjabdigilib.org

आर्किःसौरिः ज्ञःबुधः सितः शुक्रः एषांमध्येएकोपिग्रहोयदाचरोदयेचरराशौलग्नगतेस्थितोभवति तदा आशुक्षिप्रमेवयियासोर्गमनं वदेत्ब्रूयात् रविवर्ज्यमन्येषामेकतमोपियदाचरराशौलग्नगतोभवति स चवक्रगतैःप्रतीपगतिमाश्रितोभवति तदायियासोर्गमनंनेतिवक्तव्यम् यातानगच्छतीत्यर्थः ॥ ९ ॥ अन्यद्योगान्तरमाह स्थिरोदयइति स्थिरराशौलग्नगतेयस्मिंश्चजीवशनैश्चरेक्षितेबृहस्पतिसौरिभ्यांदृष्टेपृच्छ

अर्कार्किज्ञसितानामेकोपिचरोदयेयदाभवति ॥ प्रवदेत्तदाशुगमनंवक्रगतैर्नेतिवक्तव्यम् ॥ ९ ॥ स्थिरोदयेजीवशनैश्चरेक्षितेगमागमौनैववदेत्तुपृच्छतः ॥ त्रिपंचषष्ठारिपुसंगमायपापाश्चतुर्थाविनिवर्त्तनाय ॥ १० ॥

तः प्रष्टुः गमागमौनैववदेत्नब्रूयात् शत्रुगमागमौनैवभवतइत्यर्थः तस्मिन्नेवजीवशनैश्चरेक्षितें पापाः पापग्रहाः त्रिपंचषष्ठास्तृतीयपंचमषष्ठस्थानस्थाभवंति तदारिपोः शत्रोः संगमायभवंति प्रष्टुः शत्रुणासह संयोगो भवतीत्यर्थः अस्मिन्नेवपूर्वोक्तयोगेपापाअशुभग्रहाः चतुर्थाश्चतुर्थस्थानस्थास्तस्यैवशत्रोर्विनिवर्त्त

Digitized by Panjab Digital Library | www.panjabdigilib.org

नायप्रतीपगमनायभवंति शत्रुर्विनिवर्त्ततइत्यर्थः ॥ १० ॥ अथान्यद्गमनागमनाययोगांतरमाह नागच्छती ति अर्कः आदित्यः चंद्रःशशी तौलग्नाद्यदाचतुर्थभवनस्थौचतुर्थस्थानगतौभवतः तदापरचक्रंनागच्छ तिनायाति शत्रुसमूहोनायातीत्यर्थः बुधगुरुशुक्राः हिबुकेचतुर्थस्थानेयदास्थिताभवंति तदापरचक्रंशी

नागच्छतिपरचक्रंयदार्कचंद्रौचतुर्थभवनस्थौ ॥
बुधगुरुशुक्राहिबुकेयदातदाशीघ्रमायाति ॥ ११ ॥
मेषधनुःसिंहवृषायद्युदयस्थाभवंतिहिबुकेवा ॥
शत्रुर्निवर्त्ततितदाग्रहसहितावावियुक्तावा ॥ १२ ॥

घ्रमाशु आयातीत्यर्थः ॥ ११ ॥ अथान्ययोगांतरमाह मेषधनुरिति एषांमेषधनुःसिंहवृषाणांमध्येयद्ये कतमउदयस्थस्तत्काललग्नगतोभवति वाइत्यथवा तात्कालिकात् प्रश्नलग्नाद्धिबुकेचतुर्थस्थानेएषांम ध्यादन्यतमोभवति तेचग्रहैःसहिताःसमेतारहितावा तदातस्मिन्नेमकालेशत्रुर्निवर्ततेप्रतीपंगच्छतीत्य

Digitized by Panjab Digital Library | www.panjabdigilib.org

र्थः ॥ १२ ॥ अन्यच्छत्रोरनागमनप्रकारमाह स्थिरराशाविति उदयेतत्काललग्नेस्थिरराशौ तत्रैवशनिःसौरिःगुरुःजीवोवाभवति तदाशत्रुः रिपुः स्वस्थानात्चलितः तत्रैवतिष्ठति अथवाचरराशौलग्नगतेतत्रचरविःगुरुर्वाभवति तदाशत्रोरागमनं आगमःस्याद्भवेत् ॥ १३ ॥ अथयातुर्निवृत्तिज्ञानार्थंयोगंश्लोकद्वयेनाह ग्रहे

स्थिरराशौयद्युदयेशनिर्गुरुर्वास्थितस्तदाशत्रुः॥उदयेरविर्गुरुर्वाचरराशौस्यात्तदागमनं ॥१३॥ ग्रहःसर्वोत्तमबलोलग्नाद्यस्मिन्गृहेस्थितः॥मासैस्तत्तुल्यसंख्याकैर्निवृत्तिंयातुरादिशेत्॥१४॥चरांशस्थेग्रहेतस्मिन्कालमेवंविनिर्दिशेत्

ति सर्वोत्तमबलोग्रहः लग्नाद्यस्मिन्गृहेयावत्तमेस्थानेस्थितः सर्वेषामुत्तमबलः प्रधानबलोपेतः तत्तुल्यसंख्याकैः तत्तुल्यातत्समासंख्याप्रमाणं येषांमासानांतैःयातुः जिगमिषोः निवृत्तिंनिवर्तनंप्रवासान्निर्दिशेत् ॥ ॥ १४ ॥ चरांशस्थइति तस्मिन्सर्वोत्तमबलेग्रहे चरांशस्थेचरराशिनवभागस्थेपूर्वोक्तकालमेवंविनिर्दिशेत्

Digitized by Panjab Digital Library | www.panjabdigilib.org

तत्तुल्यसंख्याकैर्मासैः स्थिरभागांशकस्थेस्थिरनवांशस्थेतमेवकालं द्विगुणंद्व्यात्मकांशके द्विस्वभावनवांश
के तमेवकालंत्रिगुणंवदेत् ॥ १५ ॥ अत्रैवमतांतरमाह यातुरिति विलग्नंपृच्छालग्नंतस्माज्जामित्रभनंसप्तम
स्थानंतस्याधिपतिःस्वामीसयदायस्मिन् कालेवक्रंविपरीतंगमनंकरोतितंकालं यातुर्जिगमिषोरावृत्तेरा
वर्तनस्यप्रवासान्निवृत्तिःभवतिअपरेआचार्याःकृष्णादयोब्रूवतेकथयंति वक्रंचग्रहाणांयथासंभवंयोज्यं

द्विगुणंस्थिरभागस्थेत्रिगुणंद्व्यात्मकांशके ॥ १५ ॥ यातुर्विलग्नाज्जा
मित्रभवनाधिपतेर्यदा ॥ करोतिवक्रमावृत्तेःकालंतंब्रुवतेऽपरे ॥१६॥
उदयर्क्षाच्चंद्रर्क्षंभवतिचयावद्दिनानितावद्भिः ॥

तथाचयातुःपृच्छालग्नात्सप्तमभवनाधिपोयदावक्रीभवति तदावक्तव्यःप्रवासनिवृत्तयेकालः ॥ १६ ॥
अथशत्रोरागमने दिनप्रमाणमाह उदयेति उदयर्क्षमुदयलग्नं चंद्रर्क्षंचंद्रराशिःपृच्छाकालेयत्रचंद्रमाःस्थि
तस्तस्मादुदयर्क्षाच्चंद्रर्क्षंयावत्संख्यंभवति तावत्संख्यैर्दिनैः शत्रोःआगमनंस्यात् यदिमध्यइतिययोर्लग्नचं

Digitized by Panjab Digital Library | www.panjabdigilib.org

द्रयोर्मध्येंतरेयदिकश्चिद्ग्रहोनभवति तदैवंग्रहसंभवे शत्रुरवश्यमेवनायातीत्यर्थः ॥१७॥ इतिश्रीभट्टोत्पल्
विरचितायांषट्पंचाशिकाविवृतौगमागमाध्यायोद्वितीयः ॥ २ ॥ अथजयपराजयाध्यायोव्याख्यायते
तत्रादावेवजयपराजयज्ञानमाह दशमोदयेति उदयेलग्नेदशमसप्तमेप्रसिद्धे एतेषुस्थानेषुलग्नात्सौम्याः

आगमनंस्याच्छत्रोर्यदिमध्येनग्रहःकश्चित् ॥ १७ ॥
इतिश्रीव० पृथु० र्विर० षट्पं०गमागमाध्यायोद्वितीयः ॥ २ ॥
दशमोदयसप्तमगाःसौम्यानगराधिपस्यविजयकराः ॥
आर्किज्ञगुरुसिताःप्रभंगदौविजयदानवमे ॥ १ ॥

शुभग्रहाःगताः समवस्थिताःपृच्छालग्नेनगराधिपस्यपुरस्वामिनोराज्ञोविजयकाराः विशेषेणजयंकुर्वंति
आरोभौमःआर्किःसौरिःएतौप्रश्नलग्नात्नवमेस्थानेस्थितौ प्रष्टुःप्रभंगदौप्रकर्षेणभंगंपलायनंददतः तथा
ज्ञोबुधःगुरुःजीवः सितःशुक्रः एतेलग्नान्नवमेस्थानेस्थिताः विजयदाःविशेषेणजयदाभवंति प्रष्टुःसंग्रा

Digitized by Panjab Digital Library | www.panjabdigilib.org

मे विजयोभवतीत्यर्थः ॥ १ ॥ अथनगरयायिनःकस्यविजयोभवतीत्येतत्परिज्ञानमाह पौरास्तृतीयेति पुरेभवाः पौराःनागराः पृच्छालग्नात्तृतीयभवनप्रभृतियद्राशिषट्कं अष्टमंस्थानंयावत् तावन्नागराज्ञेयाः एतद्राशिषट्कं पौराणांशुभाशुभत्वेज्ञेयमित्यर्थः धर्माद्वायायिनः धर्मान्नवमस्थानात्प्रभृतिराशिषट्कं द्वितीयं स्थानंयावत् तावत्स्थिताज्ञेयाः एतद्राशिषट्कं यायिनांशुभाशुभत्वेज्ञेयमित्यर्थः येनादौयात्रायामुद्योगःकृतःसयायी यःपश्चात्कृतः सनागरः वाशब्दोत्रचार्थेज्ञेयः शुभैःशुभदाःएतेयथाविभागकल्पिताराशयो

पौरास्तृतीयभवनाद्धर्माद्वायायिनःशुभैःशुभदाः ॥

यस्यशुभैःसौम्यग्रहैः संयुक्ताभवंति तस्यशुभदाभवंतीत्यर्थः अर्थाद्यस्यपापैः संयुक्ताः तस्यपराजयदाः तथाचप्रश्ने धर्मावैश्चक्रदलैर्यायिनोनागरास्तृतीयादौ विजयःसौम्ययुतेस्यात्पुरभागेक्रूरसंयुतेभंगः ॥ तथा चास्मदीयेप्रश्नज्ञाने नवमाद्येचक्रदलेविज्ञेयायायिनस्तृतीयादौ पौराःशुभसंयुक्तेभागेविजयःपुरेभंगइति अर्थादेवभागद्वयेपिपापसौम्यैर्युक्तेव्यामिश्रंफलंभवति नजयोनपराजजइति व्ययदशमायेपापाइति व्ययंद्वादशंदशमंप्रसिद्धं आयमेकादशंसमाहारे एकवद्भावः तत्रपापाःपापग्रहाःपृच्छालग्नात्समवस्थिताभवंति

Digitized by Panjab Digital Library | www.panjabdigilib.org

तदापुरस्थनगरस्थनेष्टाःनशुभाभवंति यातुः यत्पुरंतस्थनशुभाः यातुःपुनःशुभकराः उपचयकराइत्यर्थः २॥ अथसंधिविरोधज्ञानार्थंयोगांतरमाह नृराशीति नृराशयःपुरुषराशयःपुरुषाकृतयोराशयःनृराशयः मिथुन कुंभतुलाकन्याःतथाचायमेवज्ञापकः तुलाथकन्यामिथुनोधटश्चनृराशयइति शुभाःसौम्यग्रहाः बुधशुक्र बृहस्पतयः एतेउदयेपृच्छालग्नेस्थिताःस्युःभवेयुः अथवातएवसौम्यग्रहानृराशिसंस्थाव्ययायसंस्थाश्चभवं

व्ययदशमायेपापाःपुरस्थनेष्टाःशुभायातुः ॥ २॥ नृराशिसंस्थात्युदयेशु भाःस्युर्व्ययायसंस्थाश्चयदाभवंति ॥ तदाशुसंधिंप्रवदेन्नृपाणांपापैर्द्विदे होपगतैर्विरोधम् ॥ ३ ॥

ति व्ययंद्वादशंआयमेकादशं चशब्दःसमुच्चये अनयोरपिसंस्थाःसमवस्थितायदाभवंतितदाआशुक्षिप्रमे वनृपाणांसंधिः संधानंप्रवदेत्ब्रूयात् पापैरिति पापारविभौमशनिक्षीणचंद्राः द्विदेहाः द्विस्वभावराशयः पा पैरशुभग्रहैर्द्विदेहोपगतैर्द्विस्वभावराशिसुसमवस्थितैर्नृपाणांएवंविरोधंविग्रहंप्रवदेत् ॥ ३ ॥ अन्यत् योगां

Digitized by Panjab Digital Library | www.panjabdigilib.org

तरमाह केंद्रोपगताइति केंद्राणिलग्नचतुर्थसप्तमदशमानि तेषूपगताः समवस्थिताः सौम्यैः शुभग्रहैः अथवातएवसौम्याः नृलग्नगाः नृराशिषुप्रागुक्तेषुस्थिताः सौम्यैः शुभग्रहैश्चदृष्टाः परस्परमवलोकयंतीत्यर्थः एवंविधाः प्रीतिंसंधिंकुर्वंतिनिवृत्तिंप्रापयंति तेषुकेंद्रेषुसमवस्थिताः पापाः तेचपापदृष्टाः परस्परंपापैरवलोकिताः विपरीतंविपर्ययं अप्रीतिंविग्रहंकुर्वंति ॥ ४ ॥ अथसेनागमनज्ञानमाह द्वितीयेति प्रश्नल

केंद्रोपगताःसौम्याःसौम्यैर्दृष्टान्नृलग्नगाःप्रीतिं ॥ कुर्वंतिपापदृष्टाःपापास्ते ष्वेवविपरीतम् ॥ ४ ॥ द्वितीयेवातृतीयेवागुरुशुक्रौयदातदा ॥ आश्वेवाग च्छतेसेनाप्रवासीवानसंशयः ॥ ५ ॥ इति षट्० तृतीयोऽध्यायः ॥ ३ ॥

ग्नायदाद्वितीयेवायथातथागुरुशुक्रौजीवसितौभवतः तदाचमूः सेनाआश्वेवागच्छति क्षिप्रमेवायाति प्रवासीअन्यदेशस्थः आश्वेवागच्छाति न संशयः निर्विकल्पंयथास्यात्तथाग्रहाणांक्रमविवक्षार्थम् कदा च्चिद्वावेवद्वितीयेवाद्वावेवतृतीयेवा एकोद्वितीयेवातृतीयेप्येकएवेति ॥ ५ ॥ इति टी० तृतीयोऽध्यायः ॥ ३ ॥

Digitized by Panjab Digital Library | www.panjabdigilib.org

अधुनाशुभाशुभलक्षणाध्यायोव्याख्यायते तत्रादावेवप्रष्टुः शुभाशुभज्ञानमाह केंद्रेति केंद्राणिलग्न १ च तुर्थ ४ सप्तम ७ दशमानि १० त्रिकोणसंज्ञेनवपंचमेशुभाःसौम्यग्रहाःकेंद्रेषुत्रिकोणेषुशुभस्थितेषुशुभाः स्थितायेषुसौम्यग्रहयुक्तेष्वित्यर्थःशुभान्वितेष्वितिपाठः तथापापेषुपापग्रहेषुकेंद्राष्टमस्थानंवर्जयित्वा अ

केंद्रत्रिकोणेषुशुभस्थितेषुपापेषुकेंद्राष्टमवर्जितेषु ॥
सर्वार्थसिद्धिंप्रवदेन्नराणांविपर्ययस्थेषुविपर्ययःस्यात् ॥ १ ॥

न्यत्रसमवस्थितेषुसत्सुनराणांमनुष्याणांसर्वार्थसिद्धिंप्रवदेत् सर्वेषांनिःशेषाणामर्थानांसिद्धिंसाधनंप्रवदेत् ब्रूयात् विपर्ययइति एषुपापसौम्येषुविपर्ययेविपरीते अन्यथास्थितेषुविपर्ययोवैपरीत्यमेवस्याद्भवेत् एतदुक्तंभवति यदापापाःकेंद्रत्रिकोणाष्टमेषुभवंति सौम्याःकेंद्रत्रिकोणाष्टमवर्ज्यमन्यत्रभवंति तदासर्वार्थाना

Digitized by Panjab Digital Library | www.panjabdigilib.org

मासिद्विंप्रवदेत् ॥ १ ॥ अधुनालाभालाभज्ञानमाह त्रिपंचेति तृतीयपंचमेस्थानेप्रसिद्धेलाभएकादशंअ
स्तमयंसप्तमंएतेषुसौम्याःशुभग्रहाःप्रष्टुर्लाभप्रदाःएष्वेवत्रिपंचलाभास्तमयेषुपापा अशुभग्रहाः नेष्टफलाः
अनिष्टमशोभनंफलंकुर्वंति अर्थनाशंसमारभंतीत्यर्थः तुलेति तुलाकन्यामिथुनराशयःप्रसिद्धाःघटःकुंभः
एतेनरराशयःपुंराशयः एतेषुलग्नेषुसौम्यग्रहाधिष्ठितेषुशुभंभद्रंमुनयोवदंतिकथयंतीत्यर्थः ॥ २ ॥ अन्यद्यो

त्रिपंचलाभास्तमयेषुसौम्यालाभप्रदानेष्टफलाश्चपापाः ॥
तुलाथकन्यामिथुनंघटश्चनृराशयस्तेषुशुभंवदंति ॥ २ ॥
स्थानप्रदादशमसप्तमगाश्चसौम्यामानार्थदाःस्वसुतलग्नगताभवंति ॥

गांतरमाह स्थानप्रदाइति सौम्याःशुभग्रहाः लग्नाद्दशमेसप्तमेचस्थानेगताःसमवस्थिताः प्रष्टुःस्थानप्रदाः
स्युः स्वशब्देनधनस्थानमुच्यते सुतस्थानंपंचमं लग्नंप्रसिद्धं एतेषुस्थिताःसौम्याःमानार्थदाःस्युर्भवेयुः पा
पाव्ययेति पापाअशुभग्रहाः व्ययोद्वादशं आयएकादशंतयोर्द्वयोः सहिताःस्थिताः नशुभप्रदाःस्युःभवेयुः

Digitized by Panjab Digital Library | www.panjabdigilib.org

नशुभफलंप्रयच्छंति लग्नइति पापाइत्यनुवर्त्तते शशीचंद्रःपापोलग्नेस्थितोनशुभइतिशुभंफलंनददाति द
शमेस्थानेसमवस्थितःपापरूपोपिशुभफलोभवतिश्रेयस्करोभवतीत्यर्थः ॥ ३ ॥ अन्यच्चशुभाशुभज्ञान
माह इंदुरिति द्विशब्देनद्वितीयंस्थानमुच्यतेसप्तमदशमेप्रसिद्धेआयएकादशंरिपुस्थानंषष्टंत्रिशब्देनतृतीयं
स्थानमुच्यते एतेषुद्वितीयतृतीयसप्तमदशमायरिपुत्रिषुसंस्थितमिंदुंचंद्रंगुरुर्जीवःपश्येत्तदाप्रष्टुःशुभफलंला

पापाव्ययायसहितानशुभप्रदाःस्युर्लग्नेशशीनशुभदोदशमेशुभश्च ॥ ३ ॥
इंदुंद्विसप्तदशमायरिपुत्रिसंस्थंपश्येद्गुरुःशुभफलंप्रमदाकृतंस्यात् ॥
लग्नत्रिधर्मसुतनैधनगाश्चपापाःकार्यार्थनाशभयदाःशुभदाःशुभाश्च॥ ४ ॥

भादिकंप्रमदाकृतंस्त्रीहेतुकंस्याद्भवेत् लग्नत्रिधर्मेति लग्नंपृच्छालग्नंत्रिशब्देनतृतीयस्थानंधर्मस्थानंनवमं
सुतस्थानंपंचमं नैधनमष्टमंएतेषुस्थानेषुपापाःपापग्रहागताः समवस्थिताःप्रष्टुःकार्यार्थनाशभयदाः का
र्यस्यकृतस्य अर्थस्यधनस्यनाशंविघातंभयंभीतिंददतीत्यर्थः शुभदाःशुभाश्चेतिएष्वेवलग्नादिषुस्थानेषुशु

Digitized by Panjab Digital Library | www.panjabdigilib.org

भाःसमवस्थिताःशुभदाःशुभफलप्रदाइत्यर्थः ॥ ४ ॥ अधुनारोगार्त्तस्यशुभाशुभज्ञानमाह शुभेति शुभग्र
हावुधगुरुशुक्राः विलग्नंपृच्छालग्नंसप्तमाष्टमपंचमस्थानानिप्रसिद्धानि एतेषुयथासंभवंशुभग्रहाःसमव
स्थितास्तेचनिरीक्षिताःसौम्यैःशुभग्रहैरेवदृष्टाः एतदुक्तंभवति शुभग्रहदृष्टस्थानस्थाःपरस्परंपश्यंतियदात
दाएषयोगोनकेवलंयावन्निशाकरश्चंद्रमास्त्रिषट्दशायेचस्याद्भवेत् तृतीयषष्ठदशमानिप्रसिद्धानि आयमे

शुभग्रहाःसौम्यनिरीक्षिताश्चविलग्नसप्ताष्टमपंचमस्थाः ॥ त्रिषट्दशायेच निशाकरःस्याच्छुभंवदेद्रोगनिपीडितानाम् ॥ ५ ॥ ॥ ७ ॥ ॥ इतिश्रीवराहमिहिरात्मजपृथुयशोविर० षट्पंचाशिकायांचतुर्थोध्यायः ॥ ४ ॥

कादशमेतेषामन्यतमेचंद्रमाभवति तदारोगनिपीडितानांव्याधिगृहीतानांशुभमारोग्यंवदेद्भूयात् अर्थादेवं
योगासंभवेसत्यशुभंवदेदिति योगेसतिशुभंब्रूयात् ॥ ५ ॥ ॥ इतिश्रीभट्टोत्पलविरचितायांषट्पंचाशि
काविवृतौशुभाशुभाध्यायश्चतुर्थः ॥ ४ ॥ ॥ ७ ॥ ॥ ७ ॥

Digitized by Panjab Digital Library | www.panjabdigilib.org

अधुनाप्रवासचिंताध्यायोव्याख्यायते तत्रादावेवागमनार्थंयोगमाह दूरगतस्येति सुतस्थानंपंचमं धन
स्थानं द्वितीयं सहजस्थानं तृतीयं एतेषुस्थानेषुलग्नात्तात्कालिकात् ग्रहैरादित्यादिभिः सर्वैः समवस्थितैः
दूरगतस्यविप्रकृष्टस्थितस्य आगमनं संप्राप्तिंवदेत् सौम्यैर्नष्टप्राप्तिमिति सौम्यैः सौम्यग्रहैः बुधगुरुसिता
क्षीणचंद्रैः तेष्वेवस्थानेषुव्यवस्थितैः नष्टस्यापहृतस्यवस्तुनः प्राप्तिंलाभं वदेत् तस्यैवप्रवासोनष्टआसीत्

॥ अथप्रवासचिंताध्यायः ॥ ॥ दूरगतस्यामनंसुतधनस
हजस्थितैर्ग्रहैर्लग्नात् ॥ सौम्यैर्नष्टप्राप्तिंलघ्वागमनंगुरुसि
ताभ्याम् ॥ १ ॥ जामित्रेत्वथवाषष्ठेग्रहःकेंद्रेथवाक्पतिः ॥

स एववाप्रवासीनष्टोऽदर्शनंगतः तद्दर्शनं भवतीत्यर्थः लघ्वागमनं गुरुसिताभ्यामिति गुरुर्बृहस्पतिः सि
तः शुक्रः आभ्यामेष्वेवस्थानेषुसमवस्थिताभ्यां लघ्वागमनं लघुनाल्पेनैवकालेन प्रवासिनामागमनं प्र
वदेत् ॥ १ ॥ अथयोगांतरमाह जामित्रइति जामित्रं सप्तमं सप्तमस्थाने अथवाषष्ठेवा पृच्छालग्नाद्यः स

Digitized by Panjab Digital Library | www.panjabdigilib.org

मवस्थितः तथाचतुर्णांकेंद्राणांच मध्यादन्यतमेकेंद्रेवाक्पतिर्भवति तदाप्रोषितस्यप्रवासितस्यागमनं प्रा
सिंविद्याज्जानीयात् त्रिकोणइति त्रिकोणेनवपंचमेज्ञोबुधः सितः शुक्रः बुधेशुक्रेवात्रिकोणयोर्नवमपंचम
स्थानयोरेवान्यतमस्थेद्वयोर्वात्रिकोणस्थयोः प्रोषितागमनं विद्यादिति ॥ २ ॥ अथयोगांतरमाह अष्टम
स्थइति निशानाथश्चंद्रमास्तस्मिन्प्रश्नलग्नादष्टमस्थे अष्टमस्थानं समवस्थितेकंटकानिकेंद्राणिलग्नचतु

प्रोषितागमनंविद्यात्त्रिकोणेज्ञेसितेपिवा ॥ २ ॥ अष्टमस्थेनिशानाथे
कंटकैः पापवर्जितैः ॥ प्रवासीसुखमायातिसौम्यैर्लाभसमन्वितः ॥
॥ ३ ॥ पृष्ठोदयेपापनिरीक्षितेवापापास्तृतीयेरिपुकेंद्रगेवा ॥

र्थसप्तमदशमानितैः पापवर्जितैः प्रवासी पथिकः सुखेनाक्लेशेनायातिआगच्छति सौम्यैः शुभग्रहैः केंद्र
स्थैः प्रवासी लाभसमन्वितः लाभयुतः सुखमायाति ॥ ३॥ अन्यद्योगांतरमाह पृष्ठोदयेतिपृष्ठोदयाः मेष
कर्कटधन्विमकरमीनाः पृष्ठोदयेपृच्छालग्ने एतेषामन्यतमे तस्मिंश्चपापनिरीक्षितेअशुभग्रहावलोकिते वा

Digitized by Panjab Digital Library | www.panjabdigilib.org

शब्दोत्रचार्थे एवं विधेयोगेप्रवासिनोवधस्ताडनं बंधो बंधनंभवेत् अथवापापाअशुभग्रहाः लग्नात्तृतीयस्था
नेस्थिताः सर्वएतेच सौम्यैः शुभग्रहैरदृष्टा अनवलोकितास्तदा प्रवासिनोनष्टास्तस्मात्स्थानादन्यदेशंगताः
अथवापापालग्नाद्रिपुस्थानेवागतास्तेच सौम्यैरदृष्टास्तदाप्रवासिनो मुषिताश्चौरैर्वापहृताः स्युर्भवेयुः वा-
शब्दोयोगानां विकल्पार्थः वधबंधदाः स्युरिति पापानां विशेषणम् ॥ ४ ॥ अधुनाप्रवासिनामागमनका

सौम्यैरदृष्टावधबंधदाः स्युर्नष्टाविनष्टामुषिताश्चवाच्याः ॥ ४ ॥ ग्रहोविल
ग्नाद्यतमेगृहेतुतेनाहताद्वादशराशयःस्युः ॥ तावद्दिनान्यागमनस्यविद्यान्नि

लज्ञानमाह ग्रहोविलग्नादिति विलग्नात्पृच्छालग्नाद्यतमेयावत्संख्ये राशौयःकश्चिद्ग्रहः स्थितः सचस्पष्टगति
स्तिष्ठेत्तेनतत्प्रमाणेनद्वादशराशयः आहतागुणिताः कार्याः एतदुक्तं भवति द्वादशसंख्यमंकंस्थाप्यलग्नात्प्रभृ
तिग्रहांतरं राशिसंख्ययागुणयेत् तत्रयावत्संख्याभवंति तावत्संख्यानिदिनानिप्रवासिनः आगमनस्यविद्या
ज्ञानीयात् तावद्भिः दिनैः पथिक आगच्छतीर्थः निवर्त्तनं वक्रंगतैरिति अथसग्रहोवक्रगतिः प्रतीपगतिस्त

Digitized by Panjab Digital Library | www.panjabdigilib.org

दातावत्संख्यैर्दिनैः प्रवासिनः प्रवासान्निवर्त्तनंभवति ॥ ५ ॥ ॥ इतिश्रीभट्टोत्पलविरचितायांषट्पंचाशिकाविवृत्तौप्रवासचिंताध्यायः पंचमः ॥ ५ ॥ ॥ ७ ॥

न० प्रा० ६

॥ ७ ॥

अथनष्टप्राप्त्यध्यायोव्याख्यायते तत्रादावेवचौरज्ञानमाह स्थिरोदयइति स्थिरावृषसिंहवृश्चिककुंभाः एषामन्यतमस्थोदयेतत्काललग्नतांप्राप्ते अथवायस्यकस्यचिद्राशेरुदयेतत्कालंस्थिरनवांशकेवर्त्तमाने अथवा

वित्तनंवक्रगतैर्ग्रहैस्तु ॥ ५ ॥ ॥ इतिश्रीवरा० पृथु० षट्पं० पंचमोऽध्यायः ५

॥ अथनष्टप्राप्त्यध्यायः ॥ ॥ स्थिरोदयेस्थिरांशेवावर्गोत्तमगतेपिवा ॥

स्थितंतत्रैवतद्द्रव्यंस्वकीयेनैवचोरितम् ॥ १ ॥

यस्यकस्यचिद्राशेर्वर्गोत्तमनवांशकोदयेवर्गोत्तमववांशाश्चरादिषु प्रथममध्यमपर्यंतगा इतिवर्गोत्तमनवांशकानांलक्षणंप्रोक्तम् एवंलग्नस्यवर्गोत्तमगतेनवांशकेवायदपहृतंद्रव्यंनूनंतत्स्वकीयेनात्मीयेनैवकेनचिच्चोरितमपहृतंतच्चतत्रैवतस्मिन्नेवस्थानेस्थितं अन्यथाअपरेणापहृतंतस्मात्तत्तत्स्थानाच्चलितमिति ॥ १ ॥

॥ १६ ॥

Digitized by Panjab Digital Library | www.panjabdigilib.org

तैर्दृष्टःअवलोकितः कीदृशः त्रिसुतमदायारिगः त्रिशब्देनतृतीयस्थानंसुतस्थानंपंचमंमदस्थानंसप्तमं आ
यएकादशंअरिस्थानंषष्ठंलग्नादित्येषांस्थानानामन्यतमस्थानेगतः समवस्थितःशशीचंद्रोगुरुरविसौम्यैर्दृष्टो
यदिभवतितदाप्रष्टुःविवाहस्यपाणिग्रहणस्यकर्त्ताविधाताभवति त्रिकोणकेंद्रेष्विति अथवासौम्याः शुभग्र
हाःत्रिकोणकेंद्रेषुनवमपंचमलग्नचतुर्थसप्तमदशमेषुयथासंभवंभवंतितदाप्रष्टुःविवाहोभवतीत्यर्थः वाश

भवतिचविवाहकर्त्तात्रिकोणकेंद्रेषुवासौम्याः ॥ २ ॥
चंद्रार्कयोःसप्तमगौसितार्कीसुखेष्टमेवापितथाविलग्नात् ॥
द्वितीयदुश्चिक्यगतौतथाचवर्षासुवृष्टिंप्रवदेन्नराणाम् ॥ ३ ॥

व्दोन्ययोगव्यवच्छेदार्थः ॥ २ ॥ अधुनावर्षासमयेवृष्टिज्ञानमाह चंद्रार्कयोरिति चंद्रःशशीअर्कःआदि
त्यः अनयोःसप्तमगौसितार्कीशुक्रशनीयथासंभवंयदिभवतः अथवाविलग्नादेवतेनैवप्रकारेणतावेवसिता
र्कीद्वितीयस्थानेदुश्चिक्येवाभवतस्तयोर्वास्थानयोस्तदावर्षासुवृष्टिंवर्षणंवदेत् ॥ ३ ॥ अधुनाप्रष्टुःप्रश्नका

Digitized by Panjab Digital Library | www.panjabdigilib.org

लेवृष्टिज्ञानमाह सौम्याइति कर्कमीनमकरकुंभाःजलराशयः सौम्याःशुभग्रहाःजलराशिषुस्थिताः सितेपक्षे शुक्लेमासार्धे पुनरयंविशेषःतृतीयधनकेंद्रगायदिभवंति तृतीयद्वितीयलग्नचतुर्थसप्तमदशमानि एतेषु यथा संभवंगताः वाशब्दोन्ययोगापेक्षायां अथवाउदयगतेचंद्रेतत्रजलराशिस्थेपृच्छायांचवर्षासुवृष्टिंप्रवदेत् ॥ ॥ ४ ॥ अथगर्भिणीनांकिंजायतइत्येतज्ज्ञानमाह पुंवर्गेति पुंस्त्रीक्रूरावितिराशीनांपुंस्त्रीसंज्ञाजातकेउक्ताः

सौम्याजलराशिस्थास्तृतीयधनकेंद्रगाःसितेपक्षे ॥ चंद्रेवाप्युदयगतेज लराशिस्थेवदेद्वर्षम् ॥ ४ ॥ पुंवर्गेलग्नगतेपुंग्रहदृष्टेबलान्वितेपुरुषः ॥

मेषमिथुनसिंहतुलाधन्विकुंभाःपुंराशयः शेषाः स्त्रीराशयः वर्गलक्षणंप्रागुक्तम् पुंवर्गेपुरुषराशिवर्गेलग्नगते तत्काललग्नतांप्राप्तेतस्मिन्पुंग्रहदृष्टेनग्रहावलोकिते क्लीबपतीबुधसौरौचंद्रसितौयोषितां नृणांशेषाः इतिग्र हाणांपुंस्त्रीनपुंसकत्वमभिहितं तेनपुंग्रहारविभौमजीवाःएतेषामन्यतमेन लग्नगतेदृष्टेतस्मिंश्चतथाभूतेलग्ने बलान्वितेवीर्ययुक्तेचपुरुषोजायते अधिपयुतोदृष्टोवाबुधजीवनिरीक्षितश्चयोराशिःसभवतिबलवान्यदादृ

Digitized by Panjab Digital Library | www.panjabdigilib.org

ष्टोपिवाशेषैरितिलग्नबलमुक्तं युग्मेस्त्रीग्रहदृष्टेइति युग्मेयुग्मराशौस्त्रीसंज्ञकेवृषादौगतेस्त्रीग्रइदृष्टेस्त्रीग्रहौचं द्रसितौताभ्यामन्यतरेणावलोकितेबलयुक्तेचस्त्रीकन्याजायते सामान्यप्रश्नलग्नेबुधयुक्तेबुधेनसंयुक्तेस्त्रीगर्भ युतासगर्भावर्तते अथापिनप्रसूयतइत्यर्थः ॥ ५ ॥ अथप्रष्टुःकीदृशीस्त्रीपुरुषोवाचेतसिवर्त्ततइत्येतत्परि ज्ञानमाह कुमारिकामिति शुक्लप्रतिपत्प्रभृतिदशम्यंतंयावच्छशीबालः एकादशीप्रभृतिकृष्णपंचमीयाव

युग्मेस्त्रीग्रहदृष्टेस्त्रीबुधयुक्तेतुगर्भयुता ॥ ५ ॥
कुमारिकांबालशशीबुधश्चवृद्धांशनिःसूर्यगुरूप्रसूताम् ॥

द्युवा षष्ठ्याद्यमावास्यांतंयावत्वृद्धः तत्रपृच्छालग्नंयदिसबालशशीबालश्चंद्रःपश्यतिलग्नेवातथाभूतःस्थि तः तदाप्रष्टुः कुमारिकांवदेत् एवमेवबुधःपश्यति तत्रावस्थितस्तथापिकुमारिकां अर्थादेवयौवनस्थेचंद्रेयौ वनोपेतांवृद्धेवृद्धामिति केचिद्बालांकुमारींचशशीबुधश्चेतिपठंति शशीबालांकरोति आपुष्यंयावत्पुष्यदर्श नंयावदित्यर्थः बालांस्त्रियंबुधःकुमारिकामनूढांकरोतिएवंशनिःसौरोविगतयौवनांजराभिभूतांकरोति सूर्यो

Digitized by Panjab Digital Library | www.panjabdigilib.org

ऽर्कःगुरुर्बृहस्पतिःएतौप्रसूतांप्रसवयुतांस्त्रियंविधत्तः कुरुतः भौमोंऽगारकः सितः शुक्रः एतौकर्कशामति दारुणांस्त्रियंकुरुतः एवमनेनप्रकारेणवयःशरीरावस्थास्याद्भवेत् पुरुषेषुचैवमिति पुरुषेष्वपिपृच्छासमयेप्रष्टुःवयोज्ञानमेवमनेनप्रकारेणवदेत् ॥ ६ ॥ अथपृच्छांपृच्छति कस्यसंबंधिनीचिंतामेमनसिवर्त्ततेइत्येतत्प

स्त्रींकर्कशांभौमसितौविधत्तएवंवयःस्यात्पुरुषेषुचैवम् ॥ ६ ॥
आत्मसमंलग्नगतैर्भ्रातासहजस्थितैःसुतःसुतगैः ॥
मातावाभगिनीवाचतुर्थगैःशत्रुगैः शत्रुः ॥ ७ ॥

रिज्ञानमाहश्लोकद्वयेन आत्मसममिति ग्रहैरादित्यादिभिःसबलैर्लग्नगतैर्लग्नस्थैः प्रष्टुः आत्मसमंस्वशरीरतुल्यःकश्चिन्मनसिवर्त्ततइतितत्कार्यंवक्तव्यमितिएवंलग्नात्सहजस्थितैस्तृतीयगैः भ्रातासुतगैःपंचमस्थानस्थैः सुतः पुत्रः चतुर्थगैश्चतुर्थस्थानस्थैर्माताजननीभगिनीचेतिवाच्यं शत्रुगैःषष्ठस्थानस्थैः रिपुर्चिंता॥७॥

Digitized by Panjab Digital Library | www.panjabdigilib.org

भार्येति लग्नात्सप्तमस्थानाश्रितैः सबलैर्ग्रहैः पत्नीवाच्या नवमेनवमस्थानस्थैर्धर्माश्रितोधर्मयुक्त इति चिंतावाच्या दशमेगुरुराचार्यइति स्वांशपंतिरित्यादि स्वश्चासावंशश्चस्वांशः आत्मीयोनवमभागस्तस्यपतिः स्वामीपृच्छालग्नेतत्कालंयोनवांशकउदितः तत्पतिर्यदालग्नस्थोभवतितदाप्रष्टुः आत्मचिंतेतिवाच्यम् अथस्वांशपतिर्मित्रंतत्काललग्नेस्थितंतदामित्रंचिंतितमितिवाच्यम् अथस्वांशपतिः शत्रुः रिपुः तत्काललग्ने

भार्यासप्तमसंस्थैर्नवमेधर्माश्रितोगुरुर्दशमे ॥
स्वांशपतिर्मित्रशत्रुषुतथैववाच्यंबलयुतेषु ॥ ८ ॥

स्थितःतदाशत्रुचिंतागतेतिवाच्यम् अथनिर्दिष्टस्थानेषुद्वौग्रहौबहवोवाभवंति तदातेषांमध्याद्योबलयुतःसयत्रस्थितः तंप्रष्टुः चित्तेगतंस्थितमितिवाच्यम् तथैवएतेनैवप्रकारेणयथाभिहितेषुबलयुक्तेषुवीर्यवत्सुमध्यात्कार्यवाच्यम् शत्रूमंदसितौसमश्चशिजोमित्राणिशेषारवेरित्यादिनाग्रंथेचजातकेमित्रशत्रुविभागः प्रद

Digitized by Panjab Digital Library | www.panjabdigilib.org

र्शितइति॥८॥अधुनाप्रवासचिंताज्ञानमाहचरलग्नेतिचराणांमेषकर्कटतुलामकराणामन्यतमेलग्नेतत्रतत्का
लंचरभागेचरनवांशके उदितस्तस्मिंश्चरलग्ने मध्यात्पंचमनवांशकात्भ्रष्टेच्युतेषष्ठादिकमंशंतत्रवर्त्ततइत्य
र्थःप्रष्टुःप्रवासचिंतास्याद्भवेत्प्रवासनिमित्तंचिंताभवेदित्यर्थः अत्रैवनिश्चयमाह भ्रष्टइति सप्तमभवनंपृच्छा
लग्नात्सप्तमोराशिस्तस्मात्तत्कालंयदिकश्चिद्ग्रहोभ्रष्टःप्रच्युतः चलितः सचभौमादिकस्तदाप्रवासीपुनर्निवृ

चरलग्नेचरभागेमध्याद्भ्रष्टेप्रवासचिंतास्यात् ॥ भ्रष्टःसप्तमभवनात्पुनर्निवृ
त्तोयदिनवक्री ॥ ९ ॥ अस्तेरविसितवक्रैः परजायांस्वांगुरौबुधेवेश्याम् ॥

त्तोनिवर्त्ततइत्यर्थः प्रवासचिंतातेनकिंतुनयास्यति यदिनवक्रीति योसौसप्तमभवनाद्भ्रष्टः ग्रहः सयदिवक्री
प्रतीपगतिर्नभवतितदानिवृत्तएववाच्यः अथवक्रीतदावृत्तोयास्यतीतिवाच्यम् ॥ ९ ॥ अथकीदृश्यास्त्रिया
सहमेसंयोगआसीदित्येतज्ज्ञानमाह अस्तेरविसितवक्रैरिति रविरादित्यः सितःशुक्रः वक्रोंऽगारकः एते
षामन्यतमेपृच्छालग्नादस्तेसप्तमेस्थानेपरजायांपरपत्नींपरभार्यायासहसंयोगआसीत् एवंगुरौजीवेस्थिते

Digitized by Panjab Digital Library | www.panjabdigilib.org

स्वामात्मीयांस्त्रियंइतिप्रवदेत् बुधेवेश्यांसाधारणस्त्रियंचंद्रेचैवंसाधारणस्त्रियमेववदेत् तथातेनैवप्रकोरणसौ रेशनैश्चरेसप्तमेऽत्यजातीनांनिकृष्टजातीनांस्त्रियंअगम्यामितिप्रवदेत् वयः शशिवदिति तासांसर्वासांस्त्रीणां शशिवच्चंद्रवद्वयः शरीरावस्थांप्रवदेदिति बालचंद्रेबालांयौवनस्थेयौवनोपेतांवृद्धेवृद्धांचंद्रप्रविभागः प्रागेवद र्शितइति ॥ १० ॥ अथरोगार्तस्यपरदेशस्थितिज्ञानमाह मंदइति मंदः सौरः सचपापसमेतोरविभौम

चंद्रेचवयःशशिवत्प्रवदेत्सौरेंत्यजातीनाम् ॥ १० ॥ मंदःपापसमेतोलग्ना न्नवमेशुभैरयुतदृष्टः ॥ रोगार्त्तःपरदेशेचाष्टमगोमृत्युकरएव ॥ ११ ॥

क्षीणचंद्राणामन्यतमेनयुक्तस्तथाभूतोलग्नात्पृच्छालग्नान्नवमेस्थानेस्थितस्तत्रचशुभैरयुतदृष्टः तत्रचशुभ ग्रहाणामन्यतमेननयुक्तोनाप्यवलोकितस्तदारोगार्त्तः रोगोज्वरादिस्तेनार्त्तः पीडितः परदेशेऽन्यस्मिन्ग्रामा दौस्थितः तथातथातेनैवलक्षणेनयुक्तः सौरोलग्नादष्टमेस्थानेगतः समवस्थितस्तदातस्यैवरोगार्त्तस्यमरणं करोति ॥ ११ ॥ अथकश्चित्पृच्छति मदीयः पितान्यदेशस्थस्तत्रकिमद्यापितिष्ठति अथवान्यदेशंगतइतिएत

Digitized by Panjab Digital Library | www.panjabdigilib.org

ज्ज्ञानमाह सौम्येति अर्कः सूर्यः सौम्यैः शुभग्रहैर्युतः सहितस्तेषामन्यतमेनचदृष्टोवलोकितोभवति तथा भूतोलग्नाच्चाष्टमर्क्षसंस्थितः तत्संस्थोष्टमस्थानमुपगतोभवति तस्माद्देशाद्ग्रामादिकादन्यंदेशांतरंगतः तस्यप्रष्टुः पिताजनकः प्राप्तइतिवाच्यः अन्यथातत्रैवस्थितः॥ १२॥अधुनाहृतस्यार्थस्यस्वरूपंतस्करकालदिग्देशानांज्ञानंतस्करस्यवयोरूपज्ञानंचाह अंशकादिति अंशकाल्लग्नस्यतात्कालिकस्यनवमभागाद्द्रव्यमपहृ

सौम्ययुतोर्कःसौम्यैःसंदृष्टश्चाष्टमर्क्षसंस्थश्च ॥ तस्माद्देशादन्यंगतः सवाच्यःपितातस्य ॥ १२ ॥ अंशकात्ज्ञायतेद्रव्यंदेष्काणैस्तस्कराःस्मृताः ॥

तंधातुमूलजीवाख्यंतज्ज्ञायतेएतत्पूर्वमेवाख्यातं स्वांशेविलग्नेयदिवात्रिकोणइति तस्यचराशितुल्योवर्णोवक्तव्यः तथाचलघुजातकेप्रोक्तम् अरुणसितहरितपाटलपांडुविचित्रासितेतरपिशंगाः पिंगलकर्बुरबभ्रूकमलिनाःकचयोयथासंख्यमिति तस्यचदीर्घमध्यह्रस्वत्वंनवांशकवशाज्ज्ञेयम् तेनचकुंभमीनमेषवृषाःह स्वाः मिथुनकर्कटधन्विमकरामध्याः सिंहवृश्चिककन्यातुलादीर्घाः तथाचास्मदीयेप्रश्नज्ञानेमेषवृषकुंभमी

Digitized by Panjab Digital Library | www.panjabdigilib.org

नाऱ्हस्वायुगकर्किचापधरमकराः मध्या हरियुवतीतुलाऽलयः स्मृतादीर्घाः इतिऱ्हस्वंपरिवर्तुलंमध्यमायतं
दीर्घम् अंशकृपतौसबलेंतः असारमल्पबलेसुखीनीचस्थितेऽस्तमितेवापिनष्टप्रायमेव एवमंशकोद्रव्यंज्ञाय
तेद्रेष्काणैर्लग्नत्रिभागैस्तस्कराश्चौराःस्मृताःउक्ताःयादृशीद्रेष्काणस्याकृतिस्तादृशीएवतस्करस्यवक्तव्या तद्य
थामेषप्रथमेद्रेष्काणेपुरुषःपरशुहस्तःकृष्णोरक्तनेत्रःरौद्रः द्वितीयेद्रेष्काणेस्त्रीलोहितांबरास्थूलोदरादीर्घमुख

राशिभ्यःकालदिग्देशावयोज्ञातिश्चलग्नपात् ॥ १३ ॥ ॥

इतिवराहमिहिर० पृथुयशाशोविरचिताषट्पंचाशिकासमाप्ता ॥

कपाला तृतीयेद्रेष्काणेपुमान्क्रूरःकपिलोरक्तांबरःदंडहस्तः वृषस्यप्रथमेद्रेष्काणेस्त्रीकुंचितलूनकेशास्थूलो
दरीदीर्घपादा द्वितीयेनरःकलावित्लांगलशास्त्रकर्मणिकुशलः तृतीयेनरोबृहत्कायः मिथुनस्यप्रथमेद्रेष्का
णेस्त्रीरूपान्विताहीनप्रजा द्वितीयेपुरुषःउद्यानसंस्थितःअपत्यरहितःकवचीधनुष्मान् तृतीयेपुमान्रत्नभू
षितः पण्डितोधनुष्मान् कर्कटप्रथमेपुरुषःहस्तिसदृशशरीरःसूकरमुखः द्वितीयेस्त्रीयौवनोपेताकर्कशाअर

Digitized by Panjab Digital Library | www.panjabdigilib.org

ण्यस्था तृतीयेपुरुषःसर्पवेष्टितःनौस्थःसुवर्णाभरणान्वितः सिंहप्रथमेशाल्मलीसंस्थोगृध्रजंतुशुकाननः द्वि
तीयेपुरुषोधनुष्मान् नताग्रनासः तृतीयेनरःकूर्चिकुंचितकेशःदंडहस्तः कन्याप्रथमेस्त्रीपुष्पयुतापूर्णेनघटे
नोपलक्षितादग्धांबरागुरुकुलंवांच्छंती द्वितीयेपुरुषोगृहीतलेखनिः श्यामोविस्तीर्णकार्मुकः तृतीयेस्त्रीगौरा
कुंभकुचाघटहस्तादेवालयेप्रवृत्ता तुलाप्रथमेपुरुषः तुलाहस्तः वीथ्यापणमतः उन्नतहस्तः भांडंचितयति
द्वितीयेपुरुषः कलशधरोगृध्रमुखः क्षुधितः तृषितश्च तृतीयेपुरुषः दीर्घमुखोधनुष्पाणिः वृश्चिकप्रथमेस्त्रीन
ग्नास्थानच्युतासर्पनिबद्धपादामनोरमा द्वितीयेभर्तृकृतेभुजंगावृतशरीरस्थासुखान्यमभिवांच्छन्ति तृतीयेपु
रुषश्चिपिटवक्त्रः धनुःप्रथमेपुरुषोधनुष्मान् द्वितीयेस्त्रीसुरूपागौरवर्णा तृतीयेपुरुषोदंडहस्तः कूर्ची मकरप्र
थमे पुरुषोरोमशः स्थूलदंतोबंधभृद्रौद्रवदनः द्वितीयेस्त्रीश्यामालंकारान्विता तृतीयेपुरुषः दीर्घमुखोधनुष्मा
न् कुंभप्रथमेपुरुषः गृध्रतुल्यमुखःसकंबलः द्वितीयेस्त्रीरक्तांबरा तृतीयेपुरुषः श्यामः मीनप्रथमेद्रेष्काणेपुरु
षोनौस्थः द्वितीयेस्त्रीगौरानौस्था तृतीयेद्रेष्काणेपुरुषःनग्नःमांससर्पवेष्टितांगः एतद्बृहज्जातकेवराहमिहिरे
णप्रोक्तं एवंद्रेष्काणे तस्कराउक्ताइति राशिभ्यः कालदिग्देशाः अथराशीनांकालविभागः मेषाद्याश्चत्वारः

Digitized by Panjab Digital Library | www.panjabdigilib.org

सधन्विमकराःक्षपावलाज्ञेयाद्वतिजातकेउक्तम् तेनमेषवृषमिथुनकर्कटधन्विमकराणामन्यतमेलग्नेसंस्थे
रात्रावपहृतम् सिंहकन्यातुलावृश्चिककुंभमीनानामन्यतमेदिवालग्नेस्थितेदिवागतमिति एवंकालः दिक्मे
षसिंहधनुषिपूर्वस्यांगतम् वृषकन्यामकरैर्दक्षिणस्यां मिथुनतुलाकुंभैःपश्चिमायांकर्कटवृश्चिकमीनैरुत्तरस्यां
दिशिगतमिति अथमेषलग्नेपृच्छाकालेस्थितेमेषेचरेभूमौवृषेतुलादौमिथुनेगीतनृत्यस्थानेसंग्रामभूमौवा
कर्कटकेजलसमीपे सिंहेआरण्यभूमौ कन्यायांनौसमीपे तुलेआपणगृहे वृश्चिकेबिलेऽभ्रे धनुषिसंग्रामे
चप्राकारभूमौमकरेजनसमीपेकुंभेशिल्पगृहेभांडोपस्करसमीपेमीनेजलसमीपइतिखचराश्चसर्वेइतिबृह
ज्जातकेप्रोक्तम् वयोजातिश्चलग्नपादिति लग्नपात्लग्नेशात् चौरस्यवयःप्रमाणंजातिंचवदेत् तथाचसंहि
तायाम् वयांसितेषांस्तनपानबाल्यव्रतस्थितायौवनमध्यवृद्धाः अतीववृद्धारविचंद्रभौमज्ञशुक्रवाग्मिनिशनै
श्चराणामिति एवंचंद्रेलग्नपतौशिशुः भौमेतुचतुर्थवर्षाधिकःबुधेब्रह्मचारीद्वादशाब्दः शुक्रेयौवनोपेतःद्वा
त्रिंशदब्दःगुरौमध्यवयाःखपंचाब्दःसूर्येसप्तत्यब्दःवृद्धःसौरेऽतीववृद्धःअशीत्यब्दः जातिःब्राह्मणादिःजीव
सितौविप्राणांक्षत्रस्यारोष्णगूविशांचंद्रःशूद्राधिपःशशिसुतःशनैश्चरःसंकरभवानामिति ॥ १३ ॥ ॥७॥

Digitized by Panjab Digital Library | www.panjabdigilib.org

इतिश्रीभट्टोत्पलविरचितायांषट्पंचाशिकाविवृतौमिश्रकाध्यायः सप्तमः ७ समाप्तेयं विवृतिसमेताषट्प
ञ्चाशिका ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

इदं पुस्तकं मुंम्बय्यां श्रीकृष्णदासात्मज गंगाविष्णु खेमराजाभ्यां स्वकीये
श्रीवेंकटेश्वराख्यमुद्रणायंत्रालयेमुद्रितम्, संवत् १९४४ शके १८०९

गङ्गाविष्णुश्रीकृष्णदास—
"श्रीवेङ्कटेश्वरछापखाना मुम्बई."

Digitized by Panjab Digital Library | www.panjabdigilib.org

विदुषामभ्यर्थना।

अत्र च महाभारतादीतिहासाः श्रीमद्भागवतादिपुराणानि सहस्रनामादिस्तोत्राणि तथा च व्याकरणन्यायादिशास्त्रनाटकाख्यायिकादिग्रंथाश्च सीसकोत्तममहल्लघ्वक्षरैश्च मनोहरं मुद्रिताः योग्यमूल्येन क्रय्याः संति तत्तांश्च ग्राहका यथासूचीपत्रं मूल्यप्रेषणेन प्राप्नुयुः।

शङ्कराचार्यकृत-शारीरक "ब्रह्मसूत्रभाष्य"-गोविंदानन्दकृत रत्नप्रभाटीकासहित

यह ग्रन्थ टीप्पणी सहित परमोत्तम पुष्ट कागजमे छापकर तयार है १६०० पृष्ट (२०० फार्म) के अनुमानहै इसमें अधिकरणमाला और मिलाई जविगी किंमत ९ रुपे है पिछेसे दाम अधिक लिये जावेंगे डाक महासूल १। ८० है

श्रीकृष्णदासात्मजो गंगाविष्णुः क्षेमराजश्च.

श्रीवेङ्कटेश्वरमुद्रायन्त्रालयम् (मुंबय्यां)

Digitized by Panjab Digital Library | www.panjabdigilib.org

॥ इति सटीकषट्पंचाशिका समाप्ता ॥

B-3808

Digitized by Panjab Digital Library | www.panjabdigilib.org